International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 186-189
© 2026 IJMH
www.themultijournal.com
Received: 30-05-2026
Accepted: 24-06-2026
Publish : 25-06-2026

**संज्ञा शतपथी**
शोधछात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः ,
तिरुपति

**Correspondence:**
**संज्ञा शतपथी**
शोधछात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः ,
तिरुपति

# त्रिफलाग्रन्थानुसारेण निषेकयोगाः

**संज्ञा शतपथी**

अस्मिन् जगति ईश्वरीयसत्तायाः सर्वोत्कृष्टकारणीभूता स्त्रीजातिरेव अस्ति। यथा प्रकृतिः जगदुत्पादने कारणीभूता तद्वदेव स्त्रीजातिरपि समग्रप्राणिनामुत्पादने कारणीभूता वर्तते, यस्यां प्रजननस्य क्षमता वर्तते। यदि पृथिव्यां नारी न भवेत्, तदा विश्वविस्तारस्य कल्पना न कर्तुं शक्यते। आधुनिकैः वैज्ञानिकैः ब्रह्माण्डस्य अनेके ग्रहोपग्रहाः अन्वेषिताः, एतादृशाः विस्फोटकाः अपि रचिताः, येषां प्रयोगेन क्षणमात्रकाले एव अस्य विश्वस्य विनाशो भवेत् , परन्तु कस्यापि जीवस्योत्पादने ते न समर्थाः । अस्मिन् जगति मानवजीवस्योत्पादने स्त्री एव समर्था । इत्यस्मिन् विषये नास्ति कोऽपि संशयः।
तर्हि अग्रे त्रिफलाग्रन्थस्थ निषेकाध्याये यत् प्रोक्तं तत् मया उपस्थाप्ये -

**"लग्नाद्वेन्दोश्च यो भावः स्वामीना वा शुभैर्युतः ।**
**दृष्टोऽथ तस्य तस्यापि प्राहुर्जन्मनि नाक्रमे ।।"**[1]

जन्मलग्नस्य यथा महत्वं वर्तते , चन्द्रलग्नस्याऽपि तथैव महत्वं भवति । यदि जन्मलग्नात् भाग्यस्थानं दुर्बलं तथा चन्द्रस्थानात् नवमस्थानं बलवान् , तर्हि व्यक्तिः भाग्यहीनः न भविष्यति । एतावत् द्वादशभावस्य विचारः अपि लग्नात्-चन्द्रात् च करणीयम् । शुभग्रहः क्रुरग्रहः वा भवतु यदि सः स्वराश्यां उपविष्टः , तर्हि यस्मिन् भावे उपविष्टः तं भावं बर्धयति । यदि चन्द्रलग्नजन्मलग्नयोर्मध्ये चन्द्रलग्नः बलवान् , तर्हि चन्द्रलग्नात् गणना करणीयम् । द्वात्रिंशत् वर्षादनन्तरं चन्द्रलग्नस्य विशेषः प्रभावः भवति , इति केचन ज्योतिषिणः मन्यन्ते ।

**चेन्दोः क्रूरे सुखे चारे रन्ध्रे स्यात् गर्भिणी मृतिः ।**
**वास्तेऽर्केंगे कुजे शस्त्राद्वारे केन्त्ये रवौ तथा ।।**[2]

गर्भिणीनाशसंभावनायोगाः यथा-
(१) यदि अशुभग्रहः चन्द्राद् चतुर्थगे तथा मंगलः अष्टमगे भवतः,तर्हि गर्भिणीनाशः भवति ।
(२) यदि सप्तमगे सूर्यः , लग्ने मंगलः च भवतः तर्हि गर्भिणीमृत्युः शस्त्रकारणात् (अर्थात् प्रसवस्य असमर्थतायाः कारणात् अर्थात् अस्त्रोपचारसमये) भविष्यति।
(3) यदि चतुर्थगे मंगलः , सूर्यः द्वादशस्थे च स्थितौ , तर्हि पूर्वोक्त अस्त्रोपचारसमये मृत्युः ज्ञातव्यम्।

**केन्द्रारेक्ष्ये यमे सांगे वेष्टादृष्टेन्त्यगैः खलैः ।**
**वांगेन्दू पापमध्यस्थौ सौम्यादृष्टौ समं पृथक् ।।**[3]

**गर्भिणीमृत्योः सम्भावनाः त्रीणि योगाः भवन्ति । यथा-**
(1) क्षीणचन्द्रः तथा मङ्गलेन दृष्टः शनिः लग्ने भवेताम् यदि ,
(2) यदि शुभग्रहैः लग्नः न दृष्टः तथा च द्वादशगे पापग्रहाः सन्ति ,
(3) यदि पापग्रहाणां मध्ये चन्द्रलग्नौ भवतः तथा शुभग्रहैः चन्द्रमङ्गलौ दृष्टौ , तर्हि गर्भिणीमृत्योः सम्भावना भवति ।

तथा च **सारावल्याम्-**

**अथवा निषेककाले विलग्नंस्थौ यदा रुधिरमन्दौ ।**
**तद्गृहगतेऽथवेन्दौ तदीक्षिते वा पतति गर्भः ।।**[4]

अभिलषन्द्भिरित्यादि पूर्वश्लोकेन लग्नेन आयुर्निरूपणीयमित्युक्तम् । अनेन लग्न-चन्द्रेण च निरूपणीयमिति सिद्धं भवति । युगपत्पृथगेव वेत्यत्र त्रिप्रकारकोऽन्वयः । युगपत्पृथगेव वा लग्नेन्दू इत्येकः। युगपत्पापद्वयमध्यसंस्थिता वेकाराशिगत पापद्वयमध्य-संस्थितावित्यर्थः। इति द्वितीयनिमित्तानि च सूचितानि । लग्नशब्देन देहो विवक्षितः । चन्द्रशब्देन मनस्तयोर्देहमनसोः पापद्वयमध्यगतयोः पापफलसूचकदुर्निमित्तगतयोर्विद्यते। प्रच्छकस्तैलाभ्यक्ताक्षिमदनच्छेदन भेदनमुण्डनादिदेहगतं दुर्निमित्तम् ।

**सूर्यादस्ते यमे वारे पुंसोः रुग्वा विधोस्त्रियः ।**
**स्वान्त्ये तथा स्वमास्यन्तेऽर्केऽब्जेऽथै कान्य युग्दृशि ।।१० ।।**[5]

गर्भाधानात् प्रसवपर्यन्तं मातृपितृणां शुभाशुभज्ञानम् –

(१)लग्नकुण्डल्यां यस्मिन् राशौ सूर्यः भवति तस्मात् सप्तमगे मंगलः शनिश्च सन्ति चेत् , पिता दुःखं प्राप्नोति।

(२) यदि मंगलः शनिश्च चन्द्रात् सप्तमगे भवतः , तर्हि माता दुःखं प्राप्स्यति ।

(३) यदि सूर्यात् द्वितीय-द्वादशगे मंगलः शनिश्च सन्ति , तर्हि यस्य गर्भमासस्य (अर्थात् द्वितीयषष्ठमासस्य) अधिपत्यौ एतौ (मंगलशनी) भवतः , तस्मिन् मासे पितुः मृत्युसदृशं पीडा भवति।

(4) यदि चन्द्रात् द्वितीय-द्वादशगे मंगलः शनिश्च सन्ति , तर्हि यस्य गर्भमासस्य अधिपत्यौ एतौ भवतः (अर्थात् द्वितीयषष्ठमासेषु) , तस्मिन् मासे मातुः मृत्युसदृशं पीडा भवति ।

(५) यदि सूर्यः मङ्गल-शन्योश्च मध्ये एकेन सह युतः तथा एकेन दृष्टः , तर्हि पिता मृत्युतुल्यं पीडा प्राप्स्यति ।
यदि चन्द्रः तस्मिन् अवस्थायां अस्ति , तर्हि माता मृत्युतुल्यं पीडा प्राप्स्यति ।

**बृहज्जातकानुसारं** पिता-माता-पितृव्य-मातृष्वसानां शुभाशुभ-ज्ञानम्–

**दिवार्कशुक्रौ पितृमातृसंज्ञकौ शनैश्चरेन्दू निशि तद्विपर्ययात् ।**
**पितृव्यमातृष्वसृसंज्ञितौ च ता वथौजयुग्मर्क्षगतौ तयौः शुभौ ।।**[6]

रात्रौ च पितृमातृग्रहकल्पनायां किञ्चिद्विशेषम्- दिवा अर्कशुक्राः इति । दिवार्कशुक्रौ पितृमातृसंज्ञितौ, शनैश्चरेन्दू पितृव्यमातृष्वसारौ । रात्रौ शनैश्चरेन्दू पितृमातरौ दिवाकरेन्दोः इति लक्षणम् चिन्त्यम्। दिवायां शुक्रस्य मातृकारकत्वात् कलत्रकारकत्वं न्यूनम् । सप्तमाधिपस्य कलत्रकारकत्वम् । रात्रौ शनेः पितृकारकत्वात् प्रेष्यकारकत्वं दुर्बलम् । तदा षष्ठाधिपस्य प्रेष्यकारकत्वम् ।

तथा च **सारावल्याम्-**

**क्षीणे शशिनि सपापे माता म्रियते पिता रवौ तद्वत् ।**
**बलिभिर्दृष्टे मित्रैर्व्याधिः सौम्यैः शुभं भवति ।।**
**विपुलविमलमूर्तिः स्वोच्चगो वा स्वराशौ**
**गुरुसुतयुत इन्दुर्बोधनेनानुदृष्टः ।**
**अतिशयसुखदाता पञ्चमे वापि मातुः**
**पितुरपि खलु तद्वद्भास्करः सर्वदैव ।।** [7]

अत्रापि दिवार्कशुक्राः इत्यादि पितृमातृकारकत्वेन प्रमाणं भवति ।

**श्रोजेऽर्के द्युनिशोर्जातो भव्यः पितृपितृव्ययोः ।**
**निशाह्योस्तयोश्चार्कौ समर्क्षे वाशुभस्तथा ।। ११ ।।**
**द्युनिशोः समभे शुक्रे मातुर्मातृष्वसुः शुभः ।**
**विषमर्क्षे च जातः स्यादशुभः क्रमतस्तयोः ।। १२ ।।**
**रात्रावोजे विधौ मातुर्दिवा मातृष्वसुः खलः ।**
**चन्द्रोऽथ समभै जातो भव्यो ज्ञेयस्तयो स्तथा ।। १३ ।।**[8]

दिवारात्रौ ग्रहाणां संज्ञा –

यदि दिवसे निषेकः जन्मं वा भवति तर्हि सूर्यः पितृसंज्ञकः , शुक्रः मातृसंज्ञकः , शनिः तातसंज्ञकः , चन्द्रः मातृष्वसुसंज्ञकः च भवन्ति। यदि रात्रौ जन्मं भवति तर्हि , शनिः पितृसंज्ञकः , चन्द्रः मातृसंज्ञकः , सूर्यः तातसंज्ञकः , शुक्रः मातृष्वसुसंज्ञकः च भवन्ति । यदि दिवसे शिशुः जायते , सूर्यश्च विषमराशिस्थः भवति , तदा पितुः शुभं भवति , यदि रात्रौ शिशुः जायते , सूर्यश्च विषमराशिस्थः भवति , तदा तातस्य शुभम् भवति । यदि दिवा जायते सूर्यश्च समराशिस्थः पितुः नाशः भवति । यदि रात्रौ जायते सूर्यः समराशिस्थः तदा तातस्य नाशः भवति ।

यदि दिवसे जायते , शनिश्च विषमराशिस्थः तदा तातस्य शुभं भवति, यदि रात्रौ जायते , शनिश्च विषमराशिस्थः तदा पितुः शुभम् भवति। यदि दिवा जायते शनिश्च समराशिस्थः ,तर्हि तातस्य नाशः भवति । यदि रात्रौ जायते शनिः समराशिस्थः तदा पितुः नाशः भवति ।

दिवा यदि जायते -

(i) यदि शुक्रः विषमराशिस्थः , तर्हि माता नश्यति , समराशिस्थश्चेत् मातुः शुभं भवति ।

(ii) चन्द्रः विषमराशिस्थः यदि , तर्हि मातृष्वसा नश्यति , समराशिस्थश्चेत् मातृष्वसुः शुभम् ।

यदि रात्रौ जायते –

(i) यदि चन्द्रः विषमराशिस्थः , तर्हि मातुः क्षतिः भविष्यति , समराशिस्थश्चेत् मातुः शुभं भवति ।

(ii) यदि शुक्रः विषमराशिस्थः , तर्हि मातृष्वसा नश्यति , समराशिस्थश्चेत् मातृष्वसुः शुभम् ।

**लग्नार्केज्येन्दुभिः पुष्टै रोजेंशे ना समेङ्गना ।**
**श्रोजेऽर्केज्यौ सुतो वांशे शुक्रेन्द्वारा युगेऽबला ॥ १४ ॥**[9]

पुत्रकन्याजन्मयोगाः –

(i) यदि लग्नसूर्यचन्द्रबृहस्पत्यः बलवन्तः भूत्वा पुरुषराशौ पुरुष-नवांशे च भवन्ति , तर्हि पुत्रः जायते , यदि स्त्रीराशौ स्त्रीनवांशे च भवन्ति , चेत् स्त्री जायते ।

यदि एतेषु ग्रहेषु केचन पुरुषराशिषु-नवांशेषु च सन्ति, केचन स्त्रीराशिषु-नवांशेषु च सन्ति , तर्हि अधिकाः ग्रहाः(येषु राशिषु नवांशेषु च सन्ति तावत् शिशुः जायते) पुरुषराशिषु नवांशेषु सन्ति चेत् पुत्रः अथवा अधिकाः स्त्रीराशिषु नवांशेषु सन्ति चेत् कन्या जायते ।

(ii) यदि बृहस्पतिः सूर्यः च पुरुषराश्योः सन्ति , तर्हि पुत्रः जायते ।

(iii) यदि चन्द्रमंगलशुक्रौ च समनवांशे सन्ति तर्हि कन्या जायते।

**बृहज्जातकानुसारं—**

गर्भे बालबालिकाज्ञानम् –

**ओजक्षै पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विन्दुभिः**
**पुंजन्मप्रवदेत्समांशकगतैयुग्मेषु तैर्योषितः ।**
**गुर्वर्कौविषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियं**
**द्यङ्गस्था बुधवीक्षिताश्च यमलौकुर्वन्ति पक्षे स्वके ।।**[10]

ओजर्भे इति । क्रूरः सौम्यः पुरुषवनिते इत्यत्रौजराशीनां पुरुषसंज्ञोक्तातेनौजराशौ ओजांशे मेषमिथुनादौ पुंस्त्वं भवति लग्नस्यार्कस्य गुरोरिन्दोश्चौजराश्यंशकयोः स्थितिश्चेत्रिः सन्दिग्धं पुंप्रजाभवतीति वक्तव्यम् । युग्मराशौ युग्मांशकगतैस्तैर्योषितो जन्म वक्तव्यम् । किमत्र राशिगुणादेव पुंस्त्रीविभागो निरूप्यते न चेत्पुरुषग्रहयोरर्कगुर्वोगुणोऽपि निरूपणीयो भवति । इह प्रकारान्तरमुच्यते । लग्नस्य लग्नांशस्यौजत्वे चन्द्रस्यापि स्त्रीग्रहत्वे स्वस्त्रीराश्यंशकत्वात् स्त्रीत्वं वक्तव्यम् । अर्कगुर्वोः स्त्रीराश्यंशकयोः स्त्रीत्वं तस्मात्स्त्रीत्वलक्षणस्याधिक्याद्योषितो योषिज्जन्म प्रवदेदित्युक्तम् । गुर्वौविषमे इत्यादि स्वतः पुरुषग्रहयोर्गुर्वर्कयोरेकस्य पुंसत्वसूचकत्वम् । राश्यंशकयोर्युग्मसंज्ञयोः स्त्रीसूचकत्वमुक्तं च ।

कथमिदमुपपन्नं भवति । उच्यते- "चक्रस्य तु नष्टादौ चौरादिपरिज्ञाने पुरुषसूचकत्वम् ।" नरास्तुशेषा इत्यत्र रविः पिता, गुरुः पुत्रः कुजो भ्राता अभिप्रेतः । पुत्रविषये पुत्रस्थानगतश्च पुत्रमरणं पुत्रोऽवनेर्यच्छतीत्युक्तस्य भौमस्य स्त्रीराश्यवस्थाने स्त्रीसूचकत्वम् । तथा च प्रश्नशास्त्रान्तरे-

शशिसितौ वक्रश्च युग्मे स्त्रियं कुर्वन्ति इत्युक्तम् । तत्र शशिसितयोः सहपाठः कृतः वक्रश्चेति पृथगुपदेशस्तेनायमर्थो गम्यते शशिसितयोर्युग्मराश्यवस्थाने वक्रस्यापि युग्मावस्थानं सूचकम् । औजर्क्ष पुरुषांशकेष्वित्यनेन राश्यंशकयोराहृतद्रव्यस्य च विषम संख्यत्वं सूचितम्।

पुरुषांशकेषु पुरुषाणां दक्षिणभागेषु कालाङ्गानीति कल्पनयौजराशिवशेन पुंजन्मव्यत्ये स्त्रीजन्म किं बहुना यद्यदोजसंज्ञं यत्पुरुषसंज्ञं च तत्पुरुषसूचकम् । एतद्विपरीतसूचकमित्यर्थः । किञ्चिदर्थान्तरमस्ति ओजर्क्षपुरुषांशकेषु स्थितैर्बलिभिर्लग्नार्कगुर्विन्दुभिर्जाताः पुंजन्मभाजो भवन्ति शक्ता भवन्तीत्यर्थाः । अन्यथा स्त्रीजन्मभाजः चपला इत्यर्थः ।

**पुत्रजन्मयोग : --**

**विहाय लग्नं विषमर्क्षसंस्थ: सौरोऽपि पुंजन्मकरो विलग्नात् ।**
**प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोङ्गना वा ।।** [11]

सौरौऽपि शब्दान्नपुंसकसंज्ञोऽपि विषमर्क्षसंस्थितिवशात्पुंजन्मकरः स्यादिति सूचितम् । प्रोक्तग्रहणामिति । प्रोक्तानां रविचन्द्र-कुजगुरुशुक्राणां मध्ये स्त्रीग्रहो बलवान् । पश्यति गतो वा पुत्रस्थानं यदि स्त्रीजन्मं पुंग्रहस्तथा स्थितश्चेत्पुंजन्मवीर्यं कारणम् । अर्थान्तरं रविगुर्वीः पुंस्त्वं चन्द्रशुक्रयोः स्त्रीत्वम् । तेषां पुंस्त्रीराशि-गतत्वादवलोक्य प्रसूतौ पुरुषो वाच्यः अङ्गना वा पुरुषस्त्रीतरचेष्टा वा यत्किंचित् पुरुषसंज्ञवशात्पुंजन्म यत्किंचित्स्त्रीसंज्ञावशात्स्त्रीजन्म इति ।

**द्वयंगांशे तौ तु ज्ञेक्षेण स्वपक्षे युगहेतवे ।**
**लग्नर्ते विषमे मन्दे नुर्जन्म समभे स्त्रियः ।। १५ ।।**[12]

पुत्रकन्यासंख्या –

(१)यदि सूर्यः बृहस्पतिश्च मिथुनधनुनवांशयोः वा भूत्वा बुधेन दृष्टश्चेत् , द्वौ पुत्रौ जायेते।

(२) यदि शुक्रः-चन्द्रः-मंगलश्च कन्यामीननवांशयोः वा भूत्वा बुधेन दृष्टश्चेत् , द्वे कन्ये जायेते ।

(३) यदि लग्नं विहाय विषमस्थानेषु अर्थात् तृतीये पञ्चमे सप्तमे नवमे एकादश्यां वा शनिः भवति तर्हि पुत्रः स्यात्, अन्येषु स्थानेषु इयं परिस्थितिः भवति चेत् , कन्या भविष्यति।

**नपुंसकजन्मयोगाः –**

**क्लीबोऽकेंन्दु मिथो दृष्टावोजस्त्रीभस्थितौ यदि ।**
**ज्ञार्की चेत्थं नृभस्थारः स्त्रीभस्थार्क तु पश्यति ।। १६ ॥**[13]

(१) यदि चन्द्रः समराशौ , सूर्यः विषमराशौ च भूत्वा द्वोयोऽपि परस्परेण दृष्टः तर्हि , नपुंसकः जायते ।

(2) यदि शनिः समराशौ , बुधः विषमराशौ च भूत्वा परस्परं पश्यतः तर्हि , नपुंसकः जायते ।

(३) यदि मंगलः विषमराशिस्थः सूर्यः समराशिस्थः च भूत्वा द्वोयोऽपि परस्परं पूर्णदृष्ट्यां पश्यतः तर्हि , नपुंसकः जायते ।

**वांगेंन्दू श्रोजगौ स्त्रीभस्थारेक्ष्यौ वा समौजगौ ।**
**इन्दुज्ञौ कुजदृष्टौ वा नरांशेंग सितेन्दवः ॥ १७ ॥**[14]

(१) लग्नः वा चन्द्रः विषमराशिस्थः भूत्वा समराशिस्थः मंगलेन दृष्टश्चेत् , नपुंसकः जायते ।

(2) मंगलः समराशिस्थचन्द्रं तथा विषमराशिस्थबुधं यदि पश्यति चेत् , नपुंसकः जायते ।

(3) लग्नचन्द्रशुक्राः त्रयः यदि पुरुषनवांशेषु भवेत् चेत् , नपुंसकः जायते ।

तथा च **बृहज्जातके**

**नपुंसकयोगः—**

**अन्योऽन्यं यदि पश्यतः शशिरवी यद्यार्कि सौमयावपि**
**वक्रो वा समगं दिनेशमसमे चन्द्रोदयौ चेत्स्थितौ ।**
**युग्मौजर्क्षगतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौ**
**पुंभागे सितलग्नशीतकिरणाः षट्वलीबयोगाः स्मृताः ।।**[15]

नपुंसकजन्म- अन्योन्यमिति । एवं क्लीबयोगा उक्ताः न केवलमाधानप्रश्नकालाभ्यां सूचकाः जातस्य जन्मकाले सन्ति चेत्संततिहानिकरा इति केचित् ।

**त्रयः सन्तानजन्मयोगाः**

**ज्ञः पश्यन् मिथुनांशस्थो द्वयंगांशस्थान् ग्रहोदयान् ।**
**गर्भे सुतैका पुत्रौ द्वौ वास्त्र्यंशस्थः सुतः सुते ॥ १९ ॥**[16]

१. यदि ग्रहाः (मङ्गलः, बृहस्पतिः इत्यादयः) लग्नश्च द्विस्वभावनवांशे स्थित्वा ते मिथुननवांशस्थबुधेन दृश्यन्ते तर्हि , द्वौ पुत्रौ एका पुत्री च इति त्रयः शिशवः एकत्र जायन्ते।

२. यदि ग्रहाः (मङ्गलः, बृहस्पतिः इत्यादयः) लग्नश्च द्विस्वभावनवांशे स्थित्वा ते कन्यानवांशस्थबुधेन दृश्यन्ते तर्हि द्वे कन्ये एकः पुत्रः च इति त्रयः शिशवः एकत्र जायन्ते।

**नृयुग्मांशो वा नृयुग्मास्त्रांशगांश्च सुतत्रयम् ।**
**स्त्र्यंशस्थो मीनकन्यांश गतांस्ताश्चांगनात्रयम् ।। २० ।।**[17]

१. अर्थात् मङ्गलः-बृहस्पतिः लग्नश्च मिथुननवांशे अथवा धनुनवांशे स्थित्वा यदि ते मिथुननवांशस्थबुधेन दृष्टाः तर्हि , त्रयः पुत्राः जायन्ते।

२.यदि मङ्गलः, बृहस्पतिः लग्नश्च कन्यानवांशे अथवा मीननवांशे स्थित्वा यदि ते कन्यानवांशस्थबुधेन दृष्टाः तर्हि , तिस्रः कन्याः जायन्ते ।

**बृहज्जातके—**

**धनुर्धरस्यान्तर्गते विलग्ने ग्रहैस्तदंशोपगतौर्बलिष्ठैः ।**
**ज्ञेनार्किणा वीर्ययुतेन दृष्टे सन्ति प्रभूता अपि कोशसंस्था ।।**[18]

धनुर्धरस्येति । अस्य योगस्य दुर्लभत्वात्फलमपि दुर्लभं भवति । उत्तरत्र लग्नात्पुत्र कलत्रभे इत्याद्युक्तस्यापत्यस्य पुत्रस्त्रीनपुंसकत्वम् ।

**वहुसन्तानजन्मयोगाः**

**चापस्याऽर्त्येगगे वांशे बलिज्ञार्कीक्षिते ग्रहैः ।**
**चान्यैः ग्रहैस्तु कोशस्थाः पञ्च सप्त दशांगजाः ।।२१।।**[19]

धनुराशिधनुनवांशश्च लग्ने यदि अर्थात् लग्नः धनुराशियुक्तः भवेत् तथा २६°-४०' तः ३०° पर्यन्तं भवति , मंगलः-बृहस्पतिः धनुनवांशे भवति तथा च बलवान्बुधः बलवान्शनिश्च लग्नं पूर्णदृष्ट्या पश्यन्ति , तर्हि त्रिभ्यः अधिकशिशवः जायन्ते ।

**बृहज्जातके बहुसुतज्ञानम्—**

**युग्मे चन्द्रसितावथौजभवने व्युर्ज्ञारजीवोदया**
**लग्नेन्दू नृनिरीक्षितौ च समगौ युग्मेषु वा प्राणिनः ।**
**कुर्युस्ते मिथुनं ग्रहोदयगतान्द्वयङ्गांशकान्पश्यति**
**स्वांशे ज्ञे त्रितयं ज्ञगांशकवशाद्युग्मं त्वीमश्रैः समम् ।**[20]

युग्म इति - अनेन श्लोकेन मिथुने प्रयोगं दर्शयते । युग्मे चन्द्रसितावित्येकः, ओजभवने स्युर्जारजीवोदया इति सिद्धं भवति ।

**सदन्त-कुब्जयोगः—**

**ज्ञस्यभस्थौ तदंशस्थौ भौमार्की दंतसंयुतः ।**
**स्वर्क्षे चन्द्रेगगे दृष्टे वाकिणारेण कुब्जकः ॥२३॥**[21]

यदि मंगलः शनिश्च उभौ बुधराशौ , बुधनवांशे भवतः , तर्हि शिशुः सदन्तः जायते ।

यदि कर्कराशिस्थः चन्द्रः लग्ने भवति तथा मंगलः शनिश्च पूर्णदृष्ट्या लग्नं पश्यतः तर्हि , शिशुः कुब्जः भविष्यति।

**पापेन्द्वीक्ष्ये शुभा दृष्टे लग्नादि त्र्यंशगे कुजे ।**
**तत्काले विशिरो बाहुक्रमः स्यात् क्रमतो ध्रुवम् ॥२६॥**[22]

**अंगहीनयोगाः –**

निषेककाले(जन्मसमये) यदि लग्ने प्रथमद्रेष्काणः उदयति , लग्ने मंगलः भवति तथा च पापग्रहाः चन्द्रश्च तं पश्यन्ति तर्हि , शिशुः शिरहीनः जायते ।

यदि अस्मिन् परिस्थितौ द्वितीयद्रेष्काणः उदयति तर्हि , शिशुः वाहुहीनः , तृतीयद्रेष्काणे शिशुः चरणहीनः जायते ।

**वामनयोगः—**

**मृगांल्यांशेंगगेर्केन्दु शमीक्ष्ये वामनो मतः ।**
**एतेप्युक्तफला योगाः यदि सौम्यैर्न वीक्षिताः ॥२७॥**[23]

यदि मकरस्य अन्तिमनवांशः निषेकलग्नसमये उदेति, चन्द्रसूर्यशनिभिश्च दृश्यते तर्हि व्यक्तिः वामनः भवति।

एते सर्वे योगाः गर्भाधानकुण्डल्यां दर्शनीयः , परन्तु गर्भाधानस्य सम्यक्समयः , लग्नः , द्रेष्कणादि यदि न ज्ञायते । तर्हि प्रश्नकुण्डल्यां अपि प्रयुज्यन्ते।

**उपसंहारः –**

सर्वेऽपि पदार्थाः सांयोगिकक्रियया एव समुत्पद्यन्ते। अत एव कस्यचिदपि पदार्थस्य स्वरूपोपलब्धिः स्वसमवायिनः पदार्थात् एव सञ्जायते। पुनः सोऽप्यग्रे भाविनं पदार्थमुत्पादयति। हिन्दुधर्मशास्त्रीयव्यवस्थायां विवाहस्य मुख्यप्रयोजनं सन्तानोत्पत्तिः एव। अत एव षोडशसंस्कारेषु गर्भाधानसंस्कारः सर्वादौ उक्तः । प्रसवानंतरं स्त्रीपुंसोः प्रकृतिः, आकारः, स्वरूपः, गुणश्च कीदृशः भविता इत्यादिसर्वमपि त्रिफलाग्रन्थदृष्ट्या निरुपितम् ।

**<u>सहायकग्रन्थसूची</u>**

1. त्रिफला(ज्योतिष) – गोपेश कुमार ओझा , मोतीलाल बनारसीदास प्रकाशनम् , वारणासी , १९९४ .
2. जातकपारिजातः – गोपेश कुमार ओझा , मोतीलाल बनारसीदास प्रकाशनम् , वारणासी , १६८३ .
3. सारावली - डाँ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी ,२००५ .
4. बृहज्जातकम् – डाँ सुरेशचन्द्रमिश्रः , रंजनपब्लिकेशन्स , दिल्ली , १९९५ .
5. लघुपाराशरी – अच्युतानन्द झा , चौखम्बा संस्कृतसंस्थानम् , वारणासी , १९६२ .
6. भारतीयज्यौतिषविज्ञानम्- डाँ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी .
7. ज्योतिर्विज्ञानशब्दकोषः – डाँ सुराकान्त झा , चौखम्बा कृष्णदास अकादमी , वारणसी .
8. अमरकोशः – अमरः , चौखम्बा सुरभारती प्रकाशनम् , २००६ .
9. भरतकोशः – मानवल्लि रामकृष्णकविः , तितिदे प्रकाशनम् , १९९९ .

**पाद टिप्पणी -**

1. त्रिफला,पृ.सं-१५९,श्लो.सं-४
2. त्रिफला,पृ.सं-१६२,श्लो.सं-८
3. त्रिफला,पृ.सं-१६२,श्लो.सं-९
4. सारावली – ८/३३
5. त्रिफला,पृ.सं-१६२,श्लो.सं-१०
6. बृहज्जातकम् – ४/५
7. सारावली – ९/४९,५०
8. त्रिफला,पृ.सं-१६३,श्लो.सं-११,१२,१३
9. त्रिफला,पृ.सं-१६४,श्लो.सं-१४
10. बृहज्जातकम् – ४/११
11. बृहज्जातकम् – ४/१२
12. त्रिफला,पृ.सं-१६५,श्लो.सं-१५
13. त्रिफला,पृ.सं-१६६,श्लो.सं-१६
14. त्रिफला,पृ.सं-१६७,श्लो.सं-१७
15. बृहज्जातकम् – ४/१३
16. त्रिफला,पृ.सं-१६८,श्लो.सं-१९
17. त्रिफला,पृ.सं-१६८,श्लो.सं-२०
18. बृहज्जातकम् – ४/१५
19. त्रिफला,पृ.सं-१६९,श्लो.सं-२१
20. बृहज्जातकम् – ४/१४
21. त्रिफला,पृ.सं-१७०,श्लो.सं-२३
22. त्रिफला,पृ.सं-१७१,श्लो.सं-२६
23. त्रिफला,पृ.सं-१७३,श्लो.सं-२७